# Bhagirathi Gadyam

# ભાગીરથીગદ્યમ્

## Document Information

Text title : bhAgIrathIgadyam

File name : bhAgIrathIgadyam.itx

Category : devii, devI, nadI, gadyam

Location : doc_devii

Description/comments : Shrimadbhagavatam skandha 5, adhyAya 17

Latest update : October 3, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2021

*sanskritdocuments.org*

# ભાગીરથીગદ્યમ્

ॐ નમો ભગવતે વાસુદેવાય ।
શ્રીશુક ઉવાચ -
તત્ર ભગવતઃ સાક્ષાદ્યજ્ઞલિઙ્ગસ્ય વિષ્ણોર્વિક્રમતો
વામપાદાઙ્ગુષ્ઠનખનિર્ભિન્નોર્ધ્વાણ્ડકટાહવિવરેણા-
ન્તઃપ્રવિષ્ટા યા બાહ્યજલધારા તચ્ચરણપઙ્કજા-
વનેજનારુણકિઞ્જલ્કોપરઞ્જિતાખિલજગદઘ-
મલાપહોપસ્પર્શનામલા સાક્ષાદ્ભગવત્પદી-
ત્યનુપલક્ષિતવચોઽભિધીયમાનાતિમહતા
કાલેન યુગસહસ્રોપલક્ષણેન દિવો
મૂર્ધન્યવતતાર યત્તદ્વિષ્ણુપદમાહુઃ ॥ ૧॥

યત્ર હ વાવ વીરવ્રત ઔત્તાનપાદિઃ પરમભાગવતો-
ઽસ્મત્કુલદેવતાચરણારવિન્દોદકમિતિ યામનુસવન-
મુત્કૃષ્યમાણભગવદ્ભક્તિયોગેન દૃઢં ક્લિદ્યમાનાન્તર્હૃદય
ઔત્કણ્ઠ્યવિવશામીલિતલોચનયુગલકુડ્મલ-
વિગલિતામલબાષ્પકલયાભિવ્યજ્યમાનરોમપુલક-
કુલકોઽધુનાપિ પરમાદરેણ શિરસા બિભર્તિ ॥ ૨॥

તતઃ સપ્તર્ષયસ્તત્પ્રભાવાભિજ્ઞા યાં નનુ તપસ
આત્યન્તિકી સિદ્ધિરેતાવતી ભગવતિ સર્વાત્મનિ
વાસુદેવેઽનુપરતભક્તિયોગલાભેનૈવોપેક્ષિતાન્યા-
ર્થાત્મગતયો મુક્તિમિવાગતાં મુમુક્ષવ ઇવ સબહુમાન-
મદ્યાપિ જટાજૂટૈરુદ્વહન્તિ ॥ ૩॥

તતોઽનેકસહસ્રકોટિવિમાનાનીકસઙ્કુલદેવયાનેના-
વતરન્તીન્દુમણ્ડલમાવાર્ય બ્રહ્મસદને નિપતતિ ॥ ૪॥

તત્ર ચતુર્ધા ભિદ્યમાના ચતુર્ભિર્નામભિશ્ચતુર્દિશ-

મભિસ્પન્દન્તી નદનદીપતિમેવાભિનિવિશતિ
સીતાલકનન્દા ચક્ષુર્ભદ્રેતિ ॥ ૫॥

સીતા તુ બ્રહ્મસદનાત્કેસરાચલાદિ ગિરિશિખરેભ્યો-
ઽધોઽધઃપ્રસ્રવન્તી ગન્ધમાદનમૂર્ધસુ પતિત્વાન્તરેણ
ભદ્રાશ્વવર્ષં પ્રાચ્યાં દિશિ ક્ષારસમુદ્રમભિપ્રવિશતિ ॥ ૬॥

એવં માલ્યવચ્છિખરાન્નિષ્પતન્તી તતોઽનુપરતવેગા
કેતુમાલમભિચક્ષુઃ પ્રતીચ્યાં દિશિ સરિત્પતિં
પ્રવિશતિ ॥ ૭॥

ભદ્રા ચોત્તરતો મેરુશિરસો નિપતિતા ગિરિશિખરા-
દ્ગિરિશિખરમતિહાય શ‌ૃઙ્ગવતઃ શ‌ૃઙ્ગાદવસ્યન્દમાના
ઉત્તરાંસ્તુ કુરૂનભિત ઉદીચ્યાં દિશિ જલધિ-
મભિપ્રવિશતિ ॥ ૮॥

તથૈવાલકનન્દા દક્ષિણેન બ્રહ્મસદનાદ્બહૂનિ
ગિરિકૂટાન્યતિક્રમ્ય હેમકૂટાદ્ધૈમકૂટાન્યતિ-
રભસતરરંહસા લુઠયન્તી ભારતમભિવર્ષં દક્ષિણસ્યાં
દિશિ જલધિમભિપ્રવિશતિ યસ્યાં સ્નાનાર્થં ચાગચ્છતઃ
પુંસઃ પદે પદેઽશ્વમેધરાજસૂયાદીનાં ફલં ન
દુર્લભમિતિ ॥ ૯॥

ઇતિ શ્રીમદ્ભાગવતે પઞ્ચમસ્કન્ધે સપ્તદશોઽધ્યાયાન્તર્ગતં
ભાગીરથીગદ્યં સમ્પૂર્ણમ્ ।

*Bhagirathi Gadyam*

pdf was typeset on October 3, 2021

Please send corrections to *sanskrit@cheerful.com*